र्वविद्भजति मां सर्वभावेन भारत १९ इति गुह्यतमं शास्त्रमिदमुक्तं मयानघ एतद्बुद्ध्वा बुद्धिमान्स्यात्कृतकृत्यश्च भारत २० इति श्रीम
द्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे पुरुषोत्तमयोगो नाम अ० १५

स्तुतं तथापि अस्मिन्नध्याये कृत्स्नस्य शास्त्रार्थस्य प्रदर्शनात् इदमपि शास्त्रं अत्र हि कार्यकारणविभागसंसारवृक्षस्यानित्यत्वं भगवतो विभूतयः परं
वेद्यं स वेदवित् वेदैश्च सर्वैरहमेव वेद्य इत्यादिना सर्वः शास्त्रार्थः दर्शितोऽस्ति इदं मया उक्तं हे अनघ निर्व्यसन एतत् तत्त्वं बुद्ध्वा बुद्धिमान् ज्ञानी स्यात् आत्मवि
द्भवेत् तावता कृत कृत्यः सर्वहितकृत् संपरमावगतिपर्यंतं तत्र वक्तव्यपुरुषार्थसमाप्तेः स्यात् मामप्राप्यतीति पश्चस्यात् भवति नातः परं कर्तव्यमवशिष्यत
इत्यर्थः २० इति नैलकंठीये भारतभावदीपे भीष्मपर्वणि भगवद्गीतार्थप्रकाशे पंचदशोऽध्यायः ॥

नवमेऽध्याये राक्षसीमासुरीं दैवीं चेति त्रिविधः संपत्सूचिता तामु राक्षसीमासुर्यामेवांतर्भाव्य द्वैविध्यं संपदां प्रपञ्चयन्नवसाधनेन हेयोपादेयाज्ञापनायेदं षोडशोऽध्याय आरभ्यते
तौ अभयं सत्त्वसंशुद्ध्यादिधीर्हन्त्वेये दैवाः दंभदर्पाद्याधीहन्त्वेयासुरा इति हेतोः शास्त्रपरिसमापनात्पूर्वाध्यायान्ते इदमुक्तं मयानघ सदृर्जुनं संबोधयतः न च त्वं दैवसंपत्ति
मत्त्वं तद्धि यद्वत्त्वासुरीं संपदिति दर्शयितुं श्रीभगवानुवाच अभयमिति अभयं स्वोच्छेदबुध्यभावः सत्त्वसंशुद्धिः चित्तनैर्मल्यं ज्ञानं श्रवणादिजन्यं योगो ज्ञाते
र्थे चित्तप्रणिधायं यथावस्थितिर्निष्ठा एषा मुख्या दैवी संपत् दानं यथाशक्ति संविभागोऽन्नादीनां दमो बाह्येंद्रियनियमः यज्ञः श्रौतस्मार्तादिः स्वाध्या
यो वेदाध्ययनं तपो वक्ष्यमाणं लक्षणं शारीरादि त्रिविधं आर्जवं ऋजुत्वं सर्वदा १ किंच अहिंसा प्राणिपीडावर्जनं सत्यं अप्रियानृतवर्जनं यथाभूतार्थ मे
भाषणं अक्रोधः परैस्ताडितस्यापि तस्य क्रोधस्योपशमनं त्यागः सर्वकर्मसंन्यासः पूर्वं दानस्योक्तत्वात् शांतिः अंतःकरणस्योपशमः अपैशुनं तद्धुर्ज

श्रीभगवानुवाच अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवं १ अहिंसा सत्यमक्रो
धस्त्यागः शांतिरपैशुनं दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलं २ तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता भवंति संपदं दै
वीमभिजातस्य भारत ३

नमपैशुनं तत्पाठः खितेषु भूतेषु कृपा अलोलुप्त्वं इंद्रियाणां विषयसंनिधावप्यविक्रिया मार्दवं मृदुता ह्रीर्लज्जा अचापलं असति प्रयोजने वाक्पाणि
पादादीनामव्यापारयितत्वं २ किंच तेजः प्रागल्भ्यं न तु त्वचो दीप्तिः क्षमा आक्रुष्टस्य ताडितस्य वांतर्विक्रियानुत्पत्तिः उत्पन्नायां विक्रियायां प्रशमनं
क्रोधदमुक्तं वृत्तिरिहेंद्रियेषु वसाद्प्रायेषु तस्य प्रतिबंधकौन्तः करणात्तीति विशेषः येनात्र त्तभिता निर्दहादौतिनावसीदतिशौचं द्विविधं मृज्जलाभ्यां
बाह्यं आभ्यंतरं मनो हृत्तनैर्मल्यं मायारागादिकालुष्याभावः नातिमानिता अत्यंतमानराहित्यं एतानि अभयादीनि दैवीं सत्त्वप्रधानां संपदं अ
भिलक्ष्य जातस्य स्वभावतो भवंति हे भारत ३

४२

ह१

अथेदानीं राजसतामसमयीं आसुरीं संपदम् आह दंभ इति दंभो धर्मध्वजित्वं दर्पः धनाभिजनादिनिमित्त उत्सेकः अभिमानः आत्मनि पू[illegible]ताबुद्धिः क्रोधः प्रसिद्धः पा
रुष्यं निष्ठुरभाषणं अज्ञानं अविवेकजनितो मिथ्याग्रहः एते आसुरीं संपदम् अभिलक्ष्य जातस्य भवंति हे पार्थ ४ अनयोः संपदोः कार्यमाह दैवीति [illegible] दै
वी पूर्वोक्ता अर्जुनस्य शंका किमहमासुर्यां संपदि जातो स्मीति तां मा शुच इति मा शुचइति ५ द्वौ इति संख्या भूतसर्गौ भूतानां स्वभावौ मे मद्वचनात् शृणु ६
प्रवृत्तिं विधिवाक्यनिवृत्तिं निषेधवाक्यं न विदुः धर्माधर्मयोः इष्टानिष्टहेतुत्वज्ञानरहिता इत्यर्थः ७ असत्यं सर्वर्जितं जगत् प्रामाण्यज्ञानेन त्यागः प्रतिष्ठं धर्मोध

दंभोदर्पोभिमानश्चक्रोधःपारुष्यमेवच अज्ञानंचाभिजातस्यपार्थसंपदमासुरीं ४ दैवीसंपद्विमोक्षायनिबंधायासुरीमता मासु
चःसंपदंदैवीमभिजातोसिपांडव ५ द्वौभूतसर्गौलोकेस्मिन्दैवआसुरएवच दैवोविस्तरशःप्रोक्तआसुरंपार्थमेशृणु ६ प्रवृत्तिंचनि
वृत्तिंचजनानविदुरासुराः नशौचंनापिचाचारोनसत्यंतेषुविद्यते ७ असत्यमप्रतिष्ठंतेजगदाहुरनीश्वरं अपरस्परसंभूतंकिमन्यत्कामहै
तुकं ८ एतांदृष्टिमवष्टभ्यनष्टात्मानोल्पबुद्धयः प्रभवंत्युग्रकर्माणःक्षयायजगतोहिताः ९ ॥ छ ॥ छ ॥ छ ॥ छ ॥

मीरूपा प्रतिष्ठा आस्थितं अलब्धं मन्यनीश्वरं अनियंतृकं आहुः अपरस्परसंभूतं अपरस्पराः क्रियासात्म्य इति स्त्रीपुंसावीजां कुरवत्सास्य कारणीभूतानां धर्मा
धर्मतत्त्वानां नाय[illegible]तस्तेभ्यो जातं किमन्यल्लोकेस्ति न किंचिद्विशेषमधिपेहं वा उत्पद्यते किंतु सर्वं कामहैतुकं स्त्रीपुंसयोर्मिथुनीभावः कामः त
द्धेतुकं स्वभावादेव जंतुर्जायते न त्वदृष्टादिरित्यर्थः ८ एतामनुपदोक्तां लोकायतिकानामभिप्रेतां दृष्टिं अवष्टभ्य आश्रित्य नष्टात्मानः कादिव सत्वेन
नष्टधैर्याः यतो ल्पसुखे दृष्टसुखे एव बुद्धिर्येषां ते अल्पबुद्धयः अहिता हिंस्राः ९

मा२

श्री॰
१२८

असद्ग्राहान्वश्याकर्षणादिमंत्रजनकायसिध्यादिसाधनेषुअसमीचीनेषुयाहाः निर्बंधास्तेताभिनिवेशाः तान्गृहीत्वा अशुचीनिमद्यमांसादिविषयाणिव्र
तानिनियमविशेषायेषांतेतथाभूताःसंतः क्षुद्रमार्गप्रवर्त्तनेनप्रवर्त्तंतेनेतेहठात्कृत्यायेतिसंबंधः १० चिंतायोगक्षेमविषयांप्रलयांतांमरणावधिंएतावत्
देहएवात्माकामभोगएवपुरुषार्थइतोन्यन्नास्तीतिनिश्चिताः निश्चयवंतः तथाचबार्हस्पत्यंसूत्रंचैतन्यविशिष्टःकायः पुरुषः कामएवैकःपुरुषार्थइतिच ११

काममाश्रित्यदुःपूरंदंभमानमदान्विताः मोहाद्गृहीत्वासद्ग्राहान्प्रवर्त्तंतेशुचिव्रताः १० चिंतामपरिमेयांचप्रलयांतामुपाश्रिताः का
मोपभोगपरमाएतावदितिनिश्चिताः ११ आशापाशशतैर्बद्धाः कामक्रोधपरायणाः ईहंतेकामभोगार्थमन्यायेनार्थसंचयान १२ इ
दमद्यमयालब्धमिमंप्राप्स्येम नोरथं इदमस्तीदमपिमेभविष्यतिपुनर्धनं १३ असौमयाहतः शत्रुर्हनिष्येचापरानपि ईश्वरोहमहंभो
गीसिद्धोहंबलवानसुखी १४ आढ्योभिजनवानस्मिकोन्योस्तिसदृशोमया यक्ष्येदास्यामिमोदिष्यइत्यज्ञानविमोहिताः १५ ॥ छ ॥

अन्यायेनपरवंचनादिनाअर्थसंचयान्धनराशीनईहंतेलिप्संते आशापाशार्विहतोतिइदमद्येति १३ क्रोधपरायणाः त्वंकामपरायणास्त्वंच
पूर्वैत्रिराभ्यामर्धाभ्यामाह असौविजितईश्वरः समर्थः सर्वेषांनिग्रहेसिद्धः लब्धाखिलभोगसाधनः बलवानविषयोपभोगेसमर्थः अतएवसुखी
१५ अ य धर्मोअभिजनवानकुलीनः अज्ञानेनाविवेकेनमोहिताः विविधंभ्रमंप्रापिताः १५

श्रीगम॰
१२८

अनेकं नास्ति एकं चित्तं नीयं यस्य तत् अनेकं बहुषु विषयेषु प्रवृत्तेषु [illegible] लयं चित्तं येषां ते अनेकचित्ताः ते च ते विभ्रांतास्तु किमिदं मा दौसाधनीयमिदमा
दौसाधनीयमिति विशेषेण भ्रांत्याकुलाः अनेकचित्तविभ्रांताः मोहो स तत्त्वपि सद्बुद्धिः तेरेव जालं तेन आवृताः प्रसक्ताः प्रकर्षेण लग्नाः अशुचौ विणमूत्रादिम
ये १६ आत्मनैवात्मानं मन्यंते ते आत्मसंभाविताः स्तब्धाः अप्रणताः धननिमित्तो मानो गर्वो मदश्च ताभ्यां अन्विताः धनमानमदान्विताः नाम यज्ञै नाममात्रैर्यज्ञैर्द
भेन धर्मध्वजितया अविधिपूर्वकं यथोक्तधन ज्ञानस्वयमृत्विक्प्रमुखादि हिंतयजंते १७ अहंकारो हमेव सर्वश्रेष्ठ इति बुद्धिः बलं शारीरं ज्ञातिधनाभिजननिमित्तं च दर्पः

अनेकचित्तविभ्रांता मोहजालसमावृताः प्रसक्ताः कामभोगेषु पतंति नरकेऽशुचौ १६ आत्मसंभाविताः स्तब्धा धनमानमदान्विताः यजंते ना
मयज्ञैस्ते दंभेनाविधिपूर्वकं १७ अहंकारं बलं दर्पं कामं क्रोधं च संश्रिताः मामात्मपरदेहेषु प्रद्विषंतोऽभ्यसूयकाः १८ तानहं द्विषतः क्रूरान्संसारेषु
नराधमान् क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु १९

एवज्ञां कामं क्रोधं च संश्रिताः मां सर्वदेहेषु अविषं आत्मदेहे स्वदेह शोषणेन कर्षयंतः शरीरस्थं भूतया मम चेतनः मां चैवांतः शरीरस्थं तान्विध्यासुरनिश्चया
निति विश्वमारणादिशा परदेहे च हिंसादिना प्रद्विषंतः अभ्यसूयकाः सर्वत्र गुणेषु वेदोक्तेषु क्षमादिषु अशक्तत्वादिलक्षणं दोषमारोपयंतः १८ तेषां फलमाह तानिति
सर्वभूतसमोप्यहं तान्वेदोक्तशासनातिगान् भक्तद्रोहकान् अहं संततमात्मानुनतः स्योपेन मे वैषम्यं स्यात् पूर्वपूर्वसंस्कारांतेनतथैव पापं कुर्वंति तदनुरूपं फलं च प्राप्नु
वंतीत्यर्थः १९

आसुरींयोनिंप्राप्तानामपिफलमाह आसुरीमिति अधमांनारकींतिर्यक्स्थावरादिरूपांवा २० संक्षेपमासुर्याःसंपन्नेराह त्रिविधमिति २० कामादिपरित्यागेकिं स्यादत आह एतैरिति तमोद्वारैः। तमसोनरकस्यदुःखमोहात्मकस्यद्वारभूतैर्विमुक्तःसन्नात्मनःश्रेयःकल्याणंभगवदाराधनादिकमाचरति ततश्चपरांगतिंमोक्षं

आसुरींयोनिमापन्नामूढाजन्मनिजन्मनि मामप्राप्यैवकौंतेयततोयांत्यधमांगतिं २० त्रिविधंनरकस्येदंद्वारंनाशनमात्मनः कामःक्रोधस्तथालोभस्तस्मादेतत्त्रयंत्यजेत् २१ एतैर्विमुक्तःकौंतेयतमोद्वारैस्त्रिभिर्नरः आचरत्यात्मनःश्रेयस्ततोयातिपरांगतिं २२ यःशास्त्रविधिमुत्सृज्यवर्त्ततेकामकारतः नससिद्धिमवाप्नोतिनसुखंनपरांगतिं २३ ७ ७ ७ ७ ७॥

यातितस्मात्कामादित्रयंत्यजेदिति २१ नकेवलंकाम्हतपरित्यजनकामादित्यागमात्रेणउह्नाश्रवर्त्तीसिध्यतीत्याह य इति शास्त्रविधिंशास्त्रोक्तंइष्टसाधन तयानिष्टसाधनतयाचज्ञापितंब्रह्मणोयजेतत्यसुरांपिबेदित्यादिनाविहितंनिषिद्धंचउत्सृज्यविहितमकरणेननिषिद्धमाचरणेनचउत्सृज्ययोवर्त्तते कामकारतइच्छयासमसिद्धिंचित्तशुद्धिंसुखंवैराग्यादिजनितं नपरांगतिंमोक्षंचनावाप्नोति २३

यस्मात्तशास्त्रातिगः शुध्यादिकं त्रयं नाप्नोति तस्मात्तेन च शुध्यादिकामस्य शास्त्रमेव प्रमाणं किं कार्यं किं न कार्यमित्यस्यां व्यवस्थायां एवं ज्ञात्वा शास्त्रं इदं कर्तव्य
मिदं न कर्तव्यमिति शासनं वेदाज्ञानरूपं विधानं च तदुल्लंघनेन प्रतिसमाधानं अग्निहोत्राद्यकरणे यं दोषस्तत्परिमार्गार्थमिदं कृच्छ्रादिकं प्रायश्चित्तं ब्रह्महत्या
दिकरणे यं दोषस्तत्परिहारार्थमिदं वाश्वमेधादिकं महाप्रायश्चित्तं शास्त्रं च विधानं च ताभ्यामुक्तं कर्म इह मनुष्यलोके कर्तुमर्हसि लोकांतरे कर्मस्वनधिकारं
दर्शयितुमिह इत्युक्तं तदेवं शास्त्रानुवर्तिन एव चित्तशुध्यादिकं नान्यस्येति सिद्धं २४ इति नैलकंठीये भारतभावदीपे भीष्मपर्वणि गीतार्थप्रकाशे षोडशोऽध्यायः
तस्माच्छास्त्रं प्रमाणं ते इति प्रश्नबीजमुपलभ्यार्जुन उवाच ये इति ये पुरुषाः शास्त्रविधिं शास्त्रं परेणाचं श्रुतिस्मृतिशिष्टाचारकुलाचारादयं ते सर्वे धर्मप्र

तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि २४ इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्म
विद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे दैवासुरसंपद्विभागयोगो नाम षोडशोऽध्यायः अर्जुन उवाच ये शास्त्रविधिमुत्सृज्य यजन्ते श्र
द्धयान्विताः तेषां निष्ठा तु का कृष्ण सत्त्वमाहो रजस्तमः १

मार्गत्यागेन त्रयो विधिर्विधेयं तदुत्सृज्य उपसर्वात्मना परिसमज्य यजन्ते देवं पूजयन्ते नातकृपा दीनमाधिता कृतोऽयं कूपो गंगास्नानादप्यधिकोऽत्रैव स्नानपानाग
हनादृपरिचर्यापुरश्चरणप्रक्रममस्मादेतत्त्वेव नाहमिष्टफलमवश्यं प्राप्स्यामीति निष्ठाजनया श्रद्धयान्विताः संतः तेषां निष्ठा इयं का कीदृशी किं सत्त्वं सात्वि
की वापि श्रेष्ठकृपेश्चद्विविकारदर्शनात् किं रजः राजसी वा तेषां निष्ठा शास्त्रातिक्रमेणाकाम्यकारकत्वात् अहोस्वित् इति प्रश्ने किं तमः तामसी वा सा निष्ठा रंगेर
जनधीस्वाशोढीयाश्रलेमहत्त्वबुद्धेर्विषयाभूषायाः दर्शनात् परिपितुर्भाष्येदृष्टव्यवहारस्पर्शनादेव श्रद्दधानतया देवादीन् पश्चेन इत्युक्तं तत्रापि वि
गीत एव दृष्टव्यवहारसंशाद्यः श्रविगीतेस्मिन् नाममस्त्वा हि शंकायाः प्रयोगात् १

भु १ स ६ अ १

एवं सामान्यतः पृष्टे सामान्यमेवोत्तरं श्रीभगवानुवाच त्रिविधेति स्वभावः प्राग्भावीयो धर्माधर्मादिसंस्कारस्ततो जाता स्वभावजा यदि प्राग्भावे सात्त्विकोऽस्य विनाप्रज्ञा हि धर्मः तेनानुष्ठितस्तर्हि तस्य शुद्धसात्त्विकैव श्रद्धा भवति यदि राजसो पक्षादिपूजाह्लादस्तर्हि राजसैव यदि तामसो भूतप्रेतादिपूजास्तर्हि तामसी श्रद्धा भवति एवं त्रिविधा श्रद्धा देहिनां देहाभिमानवतां भवति तां मया व्याख्यास्यमानां शृणु २ ननु श्रद्धा चित्तधर्मत्वात्तस्यैवात्मानं प्र ...श्रेष्ठ इति श्रद्धायाश्चात्मदर्शनसाधनेषु तां गतत्वमुच्यते कथं तस्या राजसत्वं चोच्यते इत्याह सत्त्वेति प्राक्कर्मसंस्कारोपेतं यादृशं बुद्धिसत्त्वं सात्त्विकं राजसं तामसं वा तदनुरूपैव सात्त्विकादिरूपैव तादृश्यस्तास्तु फलाय त्रयं भावनिश्चयो श्रद्धापि भवति तथायं पुरुषोऽपि श्रद्धामयः श्रद्धाप्रधानो यो यच्छ्रद्धो यथा श्रद्धयोपेतः स एव स इति सात्त्विकया श्रद्धया उपेतः सात्त्विकः एवं राजस्या राजसस्तामस्या तामस इति स एव सति यदि ज्ञानं रूपं भक्त्या प्र

श्रीभगवानुवाच त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा सात्त्विकी राजसी चैव तामसी चेति तां शृणु २ सत्त्वानुरूपा सर्वस्य श्रद्धा भवति भारत श्रद्धामयोऽयं पुरुषो यो यच्छ्रद्धः स एव सः ३ ॥ ॥ ॥ ॥ ॥ ॥ ॥

वृषराप एव सात्त्विकैव तन्मन्यते न हि तत्सात्त्विकं पुण्डरीकमिव देवान्यजन्ते अनुग्रहं... ति निमित्तकर्मण्यागनिमित्तमपि दोषमस्यापनुदेदिति यदि त्वेवं मंत्रतंत्रादिना सिद्धं स्वर्गे वासनावशाच्छ्रद्धादिरूपं मन्यते तदा तं पूज्ञा एवानुग्रहं... ति नाप्यर्कादेस्ततो निमित्तकर्मणा गते दोषमपनेतुमर्हति न हि दैवता परा धीयते स्वानुशासनात्ते यदि त्वयं प्रेतः पितामहकुटुंबमावाविषदिति सर्वधर्मान्त्यक्त्वा एनमस्याप्रियं रूपं पूजयामीति मन्यते तदा तं प्रेतरिव तत्त्वबुद्धियोगाद्विपर्यस्तं तामसं देवतापरा एवानुग्रहं... ति श्रुद्धभोगैः क्लेशाच्च नरके पातयंति ३

श्रीराम०
१७०

सतदेवंकल्प्यतेयस्मात्तस्मात्सात्विकादयोदेवादीनेवयजंतेइत्याहयजंतइतियजंतेपूजयंति ४ सात्विकेतरदोषमभिप्रेत्याह अशास्त्रेतिशास्त्रविह
रितंहि[illegible]पिनाकोलिंगाद्यागमेनविहितंघोरंस्वमांसहोमेनवाह्नरक्तालोहितादिनावादेवतासंतर्पणाद्यात्मकंयेजनाः तपस्तप्यंतेतानासुरनिश्चया
न्विधीतिद्वयोःसंबंधः दंभोधर्मध्वजित्वं अहंकारः तस्मिन्सदृशतावुद्धिः तयासंयुक्ताः कामरागोविषयाभिलाषः वलेसाहसेनाभिविषयसाधनेउत्साहः
ताभ्यांअन्विताः ५ कर्षयंतः कृशंकुर्वंतः भूतग्रामंकरणसमूहं अचेतसोमूढाः मांचैवांतःशरीरस्थंभोक्तृरूपेणशरीरांतस्थंमांपरमेश्वरंवाभोगपरस्यश

यजंतेसात्विकादेवानयक्षरक्षांसिराजसाः प्रेतान्भूतगणांश्चान्येयजंतेतामसाजनाः ४ अशास्त्रविहितंघोरंतप्यंतेयेतपोजना।
नाः दंभाहंकारसंयुक्ताः कामरागबलान्विताः ५ कर्षयंतः शरीरस्थंभूतग्राममचेतसः मांचैवांतःशरीरस्थंतान्विध्यासुरनिश्चयान्
६ आहारस्त्वपिसर्वस्यत्रिविधोभवतिप्रियः यज्ञस्तपस्तथादानंतेषांभेदमिमंशृणु ७

रीरस्यकृशीकरणेनमदाज्ञालंघनेनवाकृशीकुर्वंतः तान्विध्यासुरनिश्चयान् ६ अत्रसात्विकानांश्रद्धाराध्याहारज्ञतपोदानानांपरियहार्थंराजसतामसानांवर्जनार्थंचतेषुप्रत्येकंत्रैविध्यंविधीयतेतथापिश्रद्धात्रैविध्यंआरभ्यत्रैविध्यंचप्रागेवोक्तं आहारादीनांत्रैविध्यंप्रतिज्ञापूर्वकमाह आहारस्त्वितित्रि
हि एतदिमाहारोन्नं अतःपरंप्रायेणपदार्थस्पष्टः तथापिकिंचिकिंचिकिंचित्किंचिद्व्याख्यापते ७

आयुर्जीवनं सत्वमुत्साहः बलं शक्तिः आरोग्यं रोगराहित्यं सुखं चित्तप्रसादः प्रीतिः अभिरुचिः एतेषां विवर्धनाः वृद्धिकराः एते आयुःसत्वबलारोग्यसुखप्री
तिविवर्धनाः रस्याः रसोपेताः स्निग्धाः स्नेहवंतः स्थिराः देहे सारांशेन चिरकालस्थायिनः हृद्याः दृष्टमात्रा एव हृदयप्रियाः आहाराः घृतक्षीरादिरूपाः सात्विकप्रियाः ८
कट्विति अतिशब्दः सर्वत्र संबध्यते अतिकटुर्निंबादिः अत्यम्लातिलवणात्युष्णाः प्रसिद्धाः तीक्ष्णाः अतितीक्ष्णो मरीचादिः अतिरूक्षः स्नेहशून्यः कंगुकोद्रवादिः [illegible]

आयुःसत्वबलारोग्यसुखप्रीतिविवर्धनाः रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्विकप्रियाः ८ कट्वम्ललवणात्युष्णतीक्ष्णरूक्षवि
दाहिनः आहारा राजसस्येष्टा दुःखशोकामयप्रदाः ९ यातयामं गतरसं पूति पर्युषितं च यत् उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियं १०
अफलाकांक्षिभिर्यज्ञो विधिदृष्टो य इज्यते यष्टव्यमेवेति मनः समाधाय स सात्विकः ११ अभिसंधाय तु फलं दंभार्थमपि चैव यत् इज्यते भरत
श्रेष्ठ तं यज्ञं विद्धि राजसं १२

शोकं पश्चात्तापः विरोधे मनस्तापः आमयो धातुवैषम्यापादनरोगास्तत्प्रदाः ९ यातयामं अर्धप्रहरात् [illegible] तं शीतलतां गतमिति केचित् यातयाममर्धपक्वं निर्वीर्यस्य गतरसेनेत्युक्तत्वादिति
भाष्यं गतरसं रसविमुक्तं पूति दुर्गंधि पर्युषितं पक्वं सद्रात्र्यंतरितं उच्छिष्टं अमेध्यं यज्ञानर्हं भोजनं अन्नं तामसप्रियं १० यज्ञत्रैविध्यमाह अफलेति विधिदृष्टः अवश्यकर्तव्यतया विहितः
यष्टव्यमेव न तु [illegible] फलेच्छामकृत्वेति मनः समाधाय समाहितं कृत्वा यो यज्ञः स सात्विकः ११ राजसं यज्ञमाह अभिसंधायेति १२ ॥

विधिहीनं शास्त्रोक्तविधिहीनं असृष्टं न सृष्टं अन्नं यस्मिन् तं असृष्टान्नं १३ देवा विष्णुप्रमुखाः द्विजाः ब्राह्मणाः गुरवो मातृपित्राचार्यादयः प्राज्ञाः ब्रह्मनिष्ठाः
तेषां पूजनं आर्जवं अकौटिल्यं १४ प्रियं च तत् हितं च प्रियहितं श्रवणकाले परिणामे च सुखदं इत्यर्थः १५ मनः प्रसादः रागद्वेषादिराहित्यं सौम्यत्वं परहि

विधिहीनमसृष्टान्नं मंत्रहीनमदक्षिणं श्रद्धाविरहितं यज्ञं तामसं परिचक्षते १३ देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवं ब्रह्मचर्य
महिंसा च शारीरं तप उच्यते १४ अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत् स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते १५ मनःप्रसादः
सौम्यत्वं मौनमात्मविनिग्रहः भावसंशुद्धिरित्येतत्तपो मानसमुच्यते १६ श्रद्धया परया तप्तं तपस्तत्त्रिविधं नरैः अफलाकांक्षिभि
र्युक्तैः सात्विकं परिचक्षते १७ सत्कारमानपूजार्थं तपो दंभेन चैव यत् क्रियते तदिह प्रोक्तं राजसं चलमध्रुवं १८ मूढग्राहेणा
त्मनो यत्पीडया क्रियते तपः परस्योत्सादनार्थं वा तत्तामसमुदाहृतं १९

तैषित्वं मौनं वाक्संयमः आत्मविनिग्रहो मनोनिरोधः भावसंशुद्धिः परैः व्यवहारकाले मायाराहित्यं इति एवंप्रकारं अमत्सरत्वादिकं एतत् मानसं तप उच्यते १६
त्रिविधं कायिकवाचिकमानसभेदेन युक्तैः अवहितैः १७ सत्कारः लोके साधुः अयमिति वाक्पूजा मानः अभ्युत्थानाभिवादनादिः कायिकी पूजा
लाभादिः एतदर्थं दंभेन च यत् तपः क्रियते तत् राजसं चलं विनाशि अध्रुवं अनिश्चितफलं मूढग्राहेण अविवेककृतेन दुराग्रहेण आत्मनः शरीरस्य उ
त्सादनार्थं विनाशार्थं १९

पं१ पं२

भी०

१७२

दातव्यमेवेतिबुध्यायद्दानंप्रदेयद्रव्यंदीयतेनतुफलमुद्दिश्यदीयतेकस्मैचिदनुपकारिणेप्रत्युपकारासमर्थायदेशेकुरुक्षेत्रादौकालेसंक्रान्त्यादौयद्दीयतेतत्सा
त्विकमितिसंबंधः यच्चदानंपात्रेसमर्पणंतदपिसात्विकमितियोजना अस्यचआद्योदानशब्दः कर्मणिल्युडन्तः पात्रेपदंवाचीद्वितीयान्तः तत्संयोगात्संप्र
दानेचतुर्थ्यपेक्षाद्वितीयस्तुभावल्युडन्तः त्यागमात्रवाचीतेनतत्रपात्रभूतेषु नचचतुर्थ्यपेक्षाकर्मणायमभिप्रेतिसंप्रदानमितिपारिभाषिक्याः संप्र

दातव्यमितियद्दानंदीयतेनुपकारिणे देशेकालेचपात्रेचतद्दानंसात्विकंस्मृतं २० यत्तुप्रत्युपकारार्थंफलमुद्दिश्यवापुनः दीयते
चपरिक्लिष्टंतद्दानंराजसंस्मृतं २१ अदेशकालेयद्दानमपात्रेभ्यश्चदीयते असत्कृतमवज्ञातंतत्तामसमुदाहृतं २२

दानसंज्ञयास्वकर्मविमन्त्रभावेनाप्रवृत्तेः तेनपात्रेइतिचतुर्थ्यर्थेसप्तमीतिवामान्तशब्दस्य चतुर्थीयमितिवाकल्पनंव्यर्थमेवदानशब्दस्यावृत्त्या
चदेशकालानुपकारित्वविशिष्टेदानमित्येकाकोटिः पात्रेदानमित्यपराउभयत्रसमुच्चयेतुमहान्गुणइतिभावः२० परिक्लिष्टंकथमेतावद्द्रव्यमयः
कर्तव्यइत्याकुलान्तःकरणंयथास्यात्तथादीयतेइतिक्रियाविशेषणं २१ असत्कृतंप्रियभाषणपादप्रक्षालनादिसत्कारसहितं अवज्ञा
तंपात्रपरिभवयुक्तंदानंप्रदेयंहिरण्यादि २२

त२

भी०

१७२

च वैगुण्यार्थानां यज्ञदानतपःप्रभृतीनां संकल्पशंकायां साद्गुण्यसिध्यर्थं प्रायश्चित्तमुपदिशयेते ॐ तत्सदिति ॐमिति तदिति सदिति च त्रिविधस्त्रिप्रका
रो यं ब्रह्मणो निर्देशो नाम्नां पाठः यथा सहस्रनामानि एवमस्मिन्नपि नामपाठे ॐ एषेव नामानीत्यर्थः ओमिति ब्रह्मेति तैत्तिरीये तदिति एतस्
महतो भूतस्य नाम भवतीमितरेयके सदेव सोम्येदमग्र आसीदिति छान्दोग्ये च एतेषां शब्दानां ब्रह्मनामत्वप्रसिद्धेः तेन नामत्रयेण ब्राह्मणाद

ॐ तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुरा २३ तस्मादोमित्युदाहृत्य यज्ञ
दानतपः क्रियाः प्रवर्तन्ते विधानोक्ताः सततं ब्रह्मवादिनां २४

यो विहिताः युगसर्गादौ ब्रह्मणा एतन्नामत्रयोच्चारणसामर्थ्येन वैविध्यात्त्रविप्रादयो विहिताः प्रकाशिता इत्यर्थः यस्मादेतत्त्रयं नाम पूर्वकं
एतेषां विधानं समीचीनं दृष्टं तस्मात् त्रिष्वेतेषु नामसु ॐमित्येकमेव नाम उदाहृत्य ब्रह्मवादिनां वैदिकानां विधानोक्ताः यज्ञादयः क्रियाः स
ततं प्रवर्तन्ते तथा च श्रुतिः ओमिति ब्रह्मा प्रसौति ओं शोमिति शस्त्राणि शंसन्ति ओमित्यध्वर्युः प्रतिगरं प्रतिगृणाति ओमिति सामानि गा
यन्तीति यज्ञे सर्वेषामृत्विजां क्रिया ओंकारपूर्विकाः इमं तद्दर्शयति २४

ॐमितिनाम्नः काम्याकाम्यकर्मसाधारणेपनयत्तादेवविनियोगमुक्त्वातदितिनाम्नोनिष्कामेषुमुमुक्षुकर्मसुविनियोगंदर्शयतितदिति
मोक्षकांक्षिभिः फलंचानभिसंधायविविधाः यज्ञतपः क्रियाः दानक्रियाश्चक्रियंतेइतियोजनानानुफलंचेन्नाभिसंधीयतेतर्हिकिमभि
संधायक्रियंतइत्याकांक्षायामाहतदितिक्रियंतेइतिसर्वाः क्रियास्तदितिब्रह्मेतिक्रियंतेयथाब्रह्मवादिभिर्ब्रह्मार्पणंब्रह्म हविर्ब्रह्मा

तदित्यनभिसंधायफलंयज्ञतपःक्रियाः दानक्रियाश्चविविधाः क्रियंतेमोक्षकांक्षिभिः २५

ग्नौब्रह्मणाहुतंब्रह्मैवतेनगंतव्यंब्रह्मकर्मसमाधिनेत्युक्तदिशासर्वाः ससाधनफलाः क्रियाः ब्रह्मैवेदंसर्वमितिबुध्याक्रियंतेतथामुमुक्षु
भिरपीमर्थ्यदेवहिमुक्तानांस्वभाविकंशीलं तदेवमुमुक्षुणाशास्त्रेणविधीयतइतिप्रसिद्धेः फलमनभिसंधायेतिसान्निध्यात्तदि
त्यत्रापितामर्थ्यादभिसंधायेतिलभ्यतेतेनफलमनभिसंधायतदित्यभिसंधायक्रियाः प्रवर्तंतइत्यन्वयेपिसुलभएवतदितिब्रह्माभि
धानमुद्दार्यतिभाष्येपिउदाहृत्येतिपूर्वश्लोकोक्तक्रियानुवृत्त्यायोजनमस्मदुक्ताभिप्रायेणैवमारभ्ययेउच्चारणस्यापिब्रह्मानुसंधा
नार्थत्वादितिदिक्॥२५

मै७

ॐ तत्सच्छब्दयोर्विनियोगमुक्त्वा सच्छब्दस्य विनियोगमाह द्वाभ्यां सद्भावे इति सद्भावे अस्तित्वे साधुभावे समीचीनत्वे च सच्छब्दः सदितंकति प्रशस्ते कर्मणि सत्त्व
त्वंवेदो न कल्हारस्मवेति सत्शब्दः प्रयुज्यते आस्तिकैः २६ किंच यज्ञादौ स्थितिर्निष्ठा सदिति समीचीनेति उच्यते तदर्थीयसच्छब्दार्थकृतं तत्तदर्थीयं परमेश्वरा
र्थीकृतं कर्म सदिति समीचीनमित्येवाभिधीयते लोके जहेवं अश्रद्धान्विकं त्रिगुणां वायज्ञादिकं अश्रद्धापूर्वकं ब्रह्मणोऽभिधानत्रयोच्चारणेन सात्त्विकं स

सद्भावे साधुभावे च सदित्येतत्प्रयुज्यते प्रशस्ते कर्मणि तथा सच्छब्दः पार्थ युज्यते २६ यज्ञे तपसि दाने च स्थितिः सदिति चोच्य
ते कर्म चैव तदर्थीयं सदित्येवाभिधीयते २७ अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत् असदित्युच्यते पार्थ न च तत्प्रेत्य नो इह ३
२८ इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे श्रद्धात्रयविभागयोगो नाम सप्तदशोऽध्यायः ७

द्गुणं च संपादितं भवति २७ सर्वत्र च श्रद्धैव साद्गुण्यहेतुरिति व्यतिरेकमुखेनाह अश्रद्धयेति हुतं होमः दत्तं दानं तपः तप्तं अनुष्ठितं कृतं अश्रद्धया विहि
तं भगवन्नामत्रयस्मरणमपि यद्वा मनत्सर्वमसत् अभावमित्युच्यते पार्थ अतएव तत्प्रेत्य परलोके नोपयुज्यते इह अस्मिन्लोके वा नैवानुपयुज्य
ते तस्माच्छ्रद्धैव सात्त्विकी मातेव मुमुक्षोः शरणीकरणीयेति भावः २८ इति नीलकंठीये भारतभावदीपे गीतार्थप्रकाशे सप्तदशोऽध्यायः १७ ७

अस्यामष्टादशाध्याय्यां प्रथमेन षोडुतेतानां हितीयेस्त्रितानां शेषैस्तुस्यादितानामर्थानां कार्त्स्न्येनोपसंहारार्थोयमंतिमोध्यायस्तत्रारभ्यतेतत्र
प्रतिध्यायां ऽते स्वस्व ह्याहृतं सर्वं अर्थमिसुक्तेतत्र फलावश्यंभावनिश्चयः स्वहासाच फलवतां कर्मणामेवांगं न तु कर्मविरहस्य सम्यासस्य भा
वरूपफलवर्जितस्य अभावाद्वावोस्तुत्र युगान्तरस्यात स्वहासापेक्षं कर्मकर्मापेक्ष्या अहाद्धानपेहः समस्यासः श्रेयोन्त वासेवं हृपस्य
श्रद्धात्रैविध्यप्रयुक्तं सात्त्विकादिभेदेन त्रैविध्यं संभवति येन फलेप्यारतम्यं स्यात तत्फलस्य दृष्टिविहृेपनिरूपस्य सर्वत्र तुल्यत्वात सवकमा

अर्जुनउवाच सन्यासस्यमहावाहोतत्त्वमिच्छामिवेदितुं त्यागस्यचहृषीकेशपृथक्केशिनिषूदन १

सोपधिकर्मत्यागएवतर्हिसिद्धांतः समीहितंयदितुत्रोमिन्नोनर्हितयोर्वैलक्षण्यंविचार्यमित्याशयेनार्जुनउवाच सन्यासस्येति हेमहावा
होहेहृषीकेशहेकेशिनिषूदनेतिवहुहत्वः संवोधयन्जिज्ञासितेर्थेमादरंदर्शयति सन्यासस्यतत्त्वंयाथात्म्यंत्यागस्यचपृथक्तंवेदितुमि
च्छामित्यागस्ययाथात्म्यंसन्यासात्पृथग्भूतंवेदितुमिच्छामीतिचकारेणानुकृष्यते १

भ ३ गी २

अत्रोत्तरं श्रीभगवानुवाच काम्यानामिति काम्यानां रागतः प्राप्तानां पुत्रकामेष्ट्यादीनां ननु फलस्य कामनाविषयात् सर्वस्य कर्मणः फलवत्त्वनियमात् सर्वं
काम्यमेवेति नित्यादीनामपि मुमुक्षोः त्यागः स्यादिति तिष्ठेत् समीहितमित्याशंक्याह सर्वेति सर्वेषां नित्यनैमित्तिकानां काम्यानां कर्मणां फलत्यागमेवम्या
गं विचक्षणाः प्राहुर्न स्वरूपतस्त्यागं प्राहुरतो न विरोधः संन्यासस्त्यागतीत्यर्थः अयमाशयः यद्यपि संन्यासत्यागशब्दौ निवृत्तिमेवेच्छतः तथापि संन्यासैकरूपाद्
कायक्लेशभयाद्वा मोहाद्वा भवतीति तत्कारणानां सात्त्विकादिभेदेन भिन्नत्वात् त्यागस्यापि सात्त्विकराजसतामसभेदेन त्रैविध्यं त्रिविधस्त्यागः प्रधानत्वं

श्रीभगवानुवाच काम्यानां कर्मणां न्यासं संन्यासं कवयो विदुः सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणाः २

६१ गी १

चतुर्वोरं न चाविरक्तोऽप्यज्ञानश्चमक्तकर्मापि दृष्टं विहायहीनो दृश्यते यथोक्तं वार्त्तिकाचार्यैः प्रमादिनो बहिश्चित्ताः पिशुनाः कलहोत्सुकाः संन्यासिनोऽपि
दृश्यन्ते दैवसंदूषिताशयाः इति तस्माद्विरक्तस्य तु [illegible] संन्यासापेक्षया निष्कामकर्माचरणमेव श्रेय इत्याशयेन भ
गवता काम्यकर्मत्यागः संन्यासत्वेन नित्यादिकर्मणां फलानभिसंधानेन च त्यागत्वेन स्तूयत इति तस्मात् संन्यासोऽप्यसन्नेवेति संन्यासस्य दुष्कर
णः स्यादिति स्फुटं स्वफलं दातुं न समर्थ इति युक्तमुक्तं भगवता अत्र च द्वयोर्याहृतं सर्वं व्यर्थमिति यत्तु नित्यानामेव परिहारयोगात् काम्यानां तत्त्वबहू
नोऽपि त्यागः पूर्वार्धस्यार्थः सर्वेषां कर्मणां फलत्यागः इत्युत्तरार्धे इति व्याख्यानं उपहृत्य प्रदर्शनपरं त्रिमेलोकेन पोनरुक्त्यमावहतीत्युपेक्षितं ८

इदमेव पद्द्वयमाह त्याज्यमिति एके मुख्याः मनीषिणो मनोनिग्रहसमर्थाः परमात्मनि उत्पन्नविविदिषाणां दोषवत् रागादिवद्यथा त्याज्यस्तद्वत् कर्म त्याज्यमिति प्राहुः अपरे तु विविदिषार्थिनाय ज्ञादिकं न त्याज्यमिति चात्वाड रिम्मनुवर्तन्ते यथा चाह विधा अनेन यज्ञफलभ्ये मे न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समा इत्याद्याः अविद्वद्विषये वेदनमहद्द्वयं विदुषां तु कर्मसु प्रवृत्तिकारणस्याज्ञानस्य नष्टत्वात्

त्याज्यं दोषवदित्येके कर्म प्राहुर्मनीषिणः यज्ञदानतपः कर्म न त्याज्यमिति चापरे ३ निश्चयं
शृणु मे तत्र त्यागे भरतसत्तम त्यागो हि पुरुषव्याघ्र त्रिविधः संप्रकीर्तितः ४

स्वतः सिद्ध एव त्याग इति तात्पर्यम् इति कर्मविधिर्वा त्यागविधिर्वा न प्रवर्तन्ते यथोक्तं न कर्मणाम् जेयो योगी कर्मभिरूप जैते तत्र सावितिनिश्चयमिति तत्र कर्मणां त्यागात्यागविप्रतिपत्तौ सत्यां प्रथमोपात्ते त्यागे विषये मे मद्वचनान्निश्चयं शृणु हि यस्मात् हे पुरुषव्याघ्र त्यागस्त्रिविधः सात्त्विकराजसतामसभेदेन त्रिप्रकारः परिकीर्तितः शास्त्रे दृढवैराग्यपूर्वकः कर्मसंन्यासः सात्त्विकः आयासभयात्त्यागो राजसः मोहात्त्यागस्तामसः इति तस्मात्कृतेन त्यागो निश्चयेनैव विचारणीय इत्यर्थः ४

सूचीकटाहन्यायेन त्यागस्वरूपकथनात्प्राक् मतमत्यागपक्षं उपन्यस्यति यज्ञेति यज्ञादिकं कर्म न त्याज्यं किंतु कार्यमेव विधिगृहीतेन पुंसा अवश्यं
अनुष्ठेयमेव तत्र कारणं प्रमत्वायश्च वर्णाते चकारो हेत्वर्थः यस्मात् यज्ञो दानं तपश्चैव मनीषिणां निष्कामाणां हृष्यास्थिहितानां पावनानि चित्तशोध
कानि तथा च श्रुतिः त्रयो धर्मस्कंधा यज्ञोध्ययनं दानमिति प्रथमस्तप एव द्वितीयो ब्रह्मचर्याचार्यकुलवासी तृतीयः सर्वएते पुण्यलोका भवंतीति यज्ञा
दीनां गृहस्थधर्माणां तपसो वनस्थधर्मस्य आचार्यकुलवासस्य ब्रह्मचारिधर्मस्य च पावनत्वं दर्शयति अत्रापि यज्ञदानशब्देन गृहस्थधर्मो ज्ञेयाः तप

यज्ञदानतपःकर्म न त्याज्यं कार्यमेव तत् यज्ञो दानं तपश्चैव पावनानि मनीषिणां ५ एता
न्यपि तु कर्माणि संगं त्यक्त्वा फलानि च कर्त्तव्यानीति मे पार्थ निश्चितं मतमुत्तमं ६ ॥ ॥

इति वानप्रस्थधर्मः परिशेषात् कर्मेति ब्रह्मचारिधर्मो ज्ञेयाः ५ एवं मत्यागपक्षमुक्त्वा स्वोत्सुकं त्याज्यमंत्ताभिमतं त्यागं त्यागं समुच्चयपक्षं दर्श
यति अपिशब्द एवशब्दार्थः एतान्येव कर्माणि यज्ञदानतपांसि संगं त्यक्त्वा अहमेतेषां कर्त्तेति यावत् एवमेतानि कर्त्तव्यानीत्यभिमानं वयो वर्णाद्य
ध्यासनिमित्तं त्यक्त्वा एतैरनुष्ठितैरहं स्वर्गं वा चित्तशुद्धिं वा ज्ञानं वा प्राप्स्यामीति फलानि त्यक्त्वा च कारादेषामकरणे मम प्रत्यवायो भविष्यतीति तत
मपि अभिसंधिं त्यक्त्वा ब्रह्मनिष्ठ इस्संगस्वभावेन पुरुषेण कर्त्तव्यानि इति एवंप्रकारं मे मम मतं उत्तमं पूर्वमतात् श्रेष्ठं तत्र हि कर्तृत्वाभिमानरूपेण सं
गेन प्रत्यवायो भयाद्वा कर्मानुष्ठानं विहितं अत्र तु तदभावात् संगत्यागांशेन कर्मणां त्यागः स्वरूपेणांसमराइमिभेद ६ः ॥ ॥ ॥ ॥

श्री०
७६

प्राक्प्रतिज्ञातं त्यागत्रैविध्यमाह नियतस्येति तुशब्दः पूर्वोक्तद्वयवैलक्षण्यार्थः यस्माद्विहितं तस्मान्मुमुक्षोः नियतस्यावश्यानुष्ठेयस्य कर्मणः सं
न्यासः स्वरूपेण त्यागो नोपपद्यते न युज्यते अशुद्धस्य शुद्धिहेतुत्वात् एवं सति यो मोहादज्ञानात्तस्य नियतस्य कर्मणः परित्यागः स तामसः परिकीर्तितः अवे
ड्यपकं च मन्यते चेति विप्रतिषेधात् ७ एवं तामसमनुपपाद्य राजसं त्यागमाह दुःखमिति [illegible] दुःखमेवेदं कर्मेति मत्वा कायक्लेशभयाद्यस्त्यजे
त् स प्रमानत् तस्मादेव हेतोः राजसं तेनैव गुणनिर्वृत्तं त्यागं कृत्वा त्यागफलं चित्तशुद्धिमसौ नैव लभेत ८ एवं द्वाभ्यां श्लोकाभ्यां तामसराजसौ न मुमुक्षुत्वे
न त्यागावुक्तौ तामसराजसयोरसंभवस्य भगवतैव मोहात्तस्य परित्याग इति कायक्लेशभयात्तस्त्यजेदिति वचनात्तल्लब्धं संभवति मूढस्य । करोति

नियतस्य तु संन्यासः कर्मणो नोपपद्यते मोहात्तस्य परित्यागस्तामसः परिकीर्तितः ७ दुःखमित्येव यत्कर्म कायक्लेश
भयात्त्यजेत् स कृत्वा राजसं त्यागं नैव त्यागफलं लभेत् ८ कार्यमित्येव यत्कर्म नियतं क्रियतेऽर्जुन संगं त्यक्त्वा फलं चैव स त्यागः
सात्त्विको मतः ९

चेति विप्रतिषेधात् यदि करोति नैव मूढः यदि मूढस्तर्हि नैव करोति एवं कायक्लेशात् बिभेति नैव करोति यदि करोति नैव कायक्लेशाद्बिभेति तस्मात्करोति
कायक्लेशाद्बिभेति चेति विप्रतिषिद्धं अतस्तामसराजसयोर्मुख्यत्यागयोरसंभवान्नैवोक्तौ सात्त्विकस्य मुख्यत्यागः संभवति यथा स्फटिके जपाकु
सुमाश्रितलौहित्यं विवेकिनां प्रतीतित एवास्ति न वस्तुत एवमात्मनि दृश्यतया नेविवेकिनां कर्तृत्वं प्रतीतित एवास्ति न वस्तुनः इति वक्तुं शक्यं एवं च क
र्तृत्वाभिनिवेशशून्यः प्रमानप्रतीतितः करोति न वस्तुतः संभवत्येव त्यागोऽपि सात्त्विकस्य त्यागः इति तमेव मुख्यत्यागमधिकारिहेतुं प्रदर्शयन्नाह कार्यमिति का
र्यं कर्तव्यमित्येव यत्कर्म नियतं नित्यं क्रियतेऽर्जुन ९

राम
७६

संगं चत्यक्त्वा फलं चेति श्रवणात्सांख्यागुरुत्वात्यागस्य व्याख्यानमर्थं स एवं मतस्त्यागः सात्त्विको मतः वेदेऽपि दृष्टं तथा च श्रुतिः ईशावास्यमिदं सर्वं यत्किंचित्जगत्यां ज
गत् तेन त्यक्तेन भुंजीथा मा गृधः कस्यस्विद्धनमिति ईशा परमेश्वरेण सर्वेकारणकर्त्रात्मप्रवर्त्तकेन इदं जगत्स्थावरजंगमं जगत्यां ब्रह्मांडे स्थितं वास्यमाच्छादितं
व्याप्तं येन हेतुना सर्वं जगदधीनं तेन कारणेन त्यक्तेन त्यागेन कर्तृत्वभोक्तृत्वाभिमानवर्जनेन भुंजीथाः विषयान् भुंक्ष्व मा गृधः गर्धं कामनां मा कार्षीः कस्यचिद्धनं न कस्या
पि तत्स्वामित्वमस्तीति दृष्टेव न तत्राद्ध इत्यर्थः एवं कर्माण्यपि यज्ञादीनि कर्तृत्वाभिमानं त्यक्त्वा कुर्वन् मंगलेपो न भविष्यतीत्येतद्व्यतिरेकेण च उपायांतरं नास्तीति
श्रुतिमंत्रेणाप्रदर्शितं कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे इति इदमेव मुख्यस्य मतं भावतापदर्शितं एता
न्यपि तु कर्माणीति श्लोकेन तु नित्यानां फलमेव नास्ति किं त्यक्तव्यमिति चेत् इतस्तत एव भगवद्वचनात्तेषामपि फलमस्तीति ज्ञानी हि निष्फलत्वे वेदेनानुष्ठानासं
भवात् तथा चापस्तंबः तद्यथाम्रे फलार्थे निमित्ते छायागंधावनूत्पद्येते एवं धर्मं चर्यमाणमर्था अनूत्पद्यंत इति अनुषंगिकं फलं नित्यानां दर्शयति स्वक
रणोवत्स वायस्मृत्यापि तेषां अस्वावपरिहारः फलमिति प्रदर्शितं धर्मेण पापमपनुदतीत्यादिना च नित्येष्वपि कर्मसु फलं दृश्यते तत एव कर्त्तव्यमिति न के

पिविशेषः ए

२१३

एवममुख्यं सात्त्विकं त्यागमुक्त्वा मुख्यं तमाह न द्वेष्टीति सत्त्वेन सम्यग्ज्ञानाविष्टो व्याप्तस्त्यागी मुख्यः सात्त्विकस्त्यागी संन्यासी समर्थः अकुशलं असुखदं कर्म त्रिष
वनस्नानचतुर्गुणाशौचभिक्षाटनादि प्रयासरूपेण द्वेष्टि कुशले मिष्टान्नभिक्षादौ नानुषज्जते न संगं प्रीतिं करोतीत्यर्थः कर्म कुशले मे वा दिकं कर्म कुशले शिष्या
दौ न सज्जते तत्राकुशले वा न द्वेष्टि एतेन रागद्वेषशून्यत्वमस्य दर्शितं तत्र किं तस्य मेधावीति ऊहापोहकुशलवन्न्या निम्नानि सवलविवेचनादौ प्र
ज्ञावानत एव छिन्नसंशयः किं कर्मापि वा मुक्तिसाधनानि ज्ञानमेवेति विचिकित्सारहितः एवं त्यागी सन्ने न पञ्चरात्रेनैजपः कर्म न सा जपमित्युक्ताः
ग्राह्यावृत्तिः मेधावी सन्नेन मोहात्र संपीत्याग इत्युक्तानाम सत्त्यागाद्व्यावृत्तिः सूर्वीद्वैन त्यागं दुःखाभावबुद्धिपारने न कायक्लेशभयात्मजेदित्युक्ताद्राजसी
ग्राह्यावृत्तिः छिन्नसंशयज्ञमेनकार्यमित्येव यत्कर्म नियुक्ता इत्युक्तसात्त्विकत्यागाद्व्यावृत्तिः न त्यसौ कर्माणि तु छन्नं समात्तस्य महाभागपत्नं तत्वतो वेदवेद

८१

न द्वेष्ट्यकुशलं कर्म कुशले नानुषज्जते त्यागी सत्त्वसमाविष्टो मेधावी छिन्नसंशयः १० ॥

से०

चेत्स्वगमपि कर्म सन्न तिष्ठेत् तन्न हि द्दाहापशमार्थी निकरस्थं ज्ञानं तवीमहाकृष्टं ज्ञानम् श्रीष्मोष्मप्रतप्त पाथसि पत्त्वे क्षणम पि रमेत संशयच्छेदे पिहे नु सत
समाविश इत्यतः सत्वेनैव कर्त्री सम्यग्ज्ञा विष्टो यं न तु अयं सत्त्वमाश्रित इति महान्विशेषः एवं च पूर्वश्लोकोक्तस्य सात्त्विकत्यागस्य सम्यक् कर्मयोग फलभूतो
यं मुख्यः संन्यासो विविदिषाणामनुष्ठेयो यद् देहो वा विरजेत्तद् देह एव प्रव्रजेत्तदहरेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्तीति श्रुतिभ्यः भाष्ये तु नन्वकर्मपुष्पित्याग
स्त्रिविधः संन्यास इति च प्रकृतः तत्र तामसो राजसश्च त्यागः केयमिह संगफलत्यागस्तृतीयत्वेनोच्यते त्रयो ब्राह्मणात्यागेनात्र षड् गते द्रौ कृत्रियस्तु
तीय इति तदुत्तेनैष दोषः त्यागत्वसामान्येव स्तुत्यर्थत्वात् सात्त्विकं कर्म संन्यासस्य फलाभिसंधित्यागस्य च त्यागत्वसामान्ये तत्र राजसतामसत्वेन कर्मत्यागे नि
दया कर्मफलाभिसंधित्यागः सात्त्विकत्वेन स्तूयते सन्त्यागः सात्त्विको मत इ

समर्

मिञ्च

तिरंश्चेनत्यागत्रैविध्यंसमाधायएवंसंगफलत्यागपूर्वकंनित्यकर्मानुष्ठानेनविशुद्धांतःकरणस्यतत्त्वज्ञानाभिमुखस्यसंन्यासंनिष्ठाक्रमेकथयन्नार्थयंश्लो
कद्वयमुक्तंतथैवश्लोकंव्याख्यायपूर्वोक्तस्यकर्मयोगस्यप्रयोजनमनेनश्लोकेनोक्तमित्युपसंहृतं।अनेनतुफलाभिसंधिविशिष्टस्यकर्मणस्त्यागस्त्रिविधः
विशेषणाभावात्विशेष्याभावात्उभयाभावात्तत्राद्योत्रैविध्यविधिस्थितःद्वितीयस्तुतामसराजसभेदेनद्विविधोप्यत्रैवनिंदितःतृतीयस्तुकर्मा
नधिकारिणाविविदिषुणाचकर्तुंयोग्योद्विविधःतत्राद्यःस्थितप्रज्ञलक्षणादौप्राग्व्याख्यातःद्वितीयस्तुनैष्कर्म्यसिद्धिंपरमामित्यत्रवक्ष्यतेतत्रभा
त५ ष्यानुसेत्यागविधाःप्रतिज्ञापदेहृयथावत्प्रदर्शितंतृतीयापिकेनचित्सन्न्यासेनप्रदर्शितात्रत्रतुएकस्माद्द्वयोरंतर्भावंकृत्वाद्वएवविधेउपयाघेत्तृतीया
प्रदेशांतरेप्रक्षिप्तमितिपद्यकृत्तेप्रतिज्ञायाश्चनिर्वाहइतिशेषः१०

तिपा२

स्वयमेवसात्विकंत्यागंअनुष्ठातुंप्रयोजनमाहनहीति देहभृतादेहाभिमानिनाहियस्मात्तस्मात्अशेषतःकर्माणित्यक्तुंनशक्यंअशक्यंज्ञानाया
त्मालोपप्रसंगात्तस्मात्अविद्वतःसत्वपः कर्मफलत्यागशीलः तुशब्दस्यार्थः सएवत्यागीत्यभिधीयतेयस्त्वशेषतः कर्माणित्यक्तुंश तिपर
मार्थदर्शीसम्यक्त्वसत्यागीत्यर्थः॥११॥ एवंभूतस्यत्यागस्यफलमाह अनिष्टमिति अनिष्टं नारकतिर्यगादिलक्षणं इष्टं देवतादिरूपं मिश्रंमानुष्यभावइतिकर्म
णः कर्मजातीयस्यफलंत्रिविधंप्रेत्यमरणानंतरंत्यागिनांपूर्वोक्तसत्वसमासहीनानांभवतिमुख्यसंन्यासिनांतुनकदाचिदपिभवतितेषांकर्तृत्वाभिमाना

नहिदेहभृताशक्यंत्यक्तुंकर्माण्यशेषतः यस्तुकर्मफलत्यागीसत्यागीत्यभिधीयते ॥११॥ अनिष्टमिष्टंमिश्रंचत्रि
विधंकर्मणःफलं भवत्यत्यागिनांप्रेत्यनतुसंन्यासिनांक्वचित् ॥१२॥

भावात्अन्येतुगौणसंन्यासिनामेवायंकर्मालेपउपदेशमाहुः तथाचव्याख्यातंकार्यमित्येवयत्कर्मसत्त्वसमासिनांगौणसंन्यासिनांचविशेषोनस्यात्तन्नेच
वंमुख्यसंन्यासिनांगौणसंन्यासिनांचविशेषापत्तिरितिवाच्यंउभयोरपिमुक्तस्यकर्मश्लेषसाम्येपिपूर्वकर्मणांदाहादाहकृतस्यविशेषस्यसत्त्वात्गौणसंन्यासि
नांज्ञानानंतरादिकमपिपूर्वकर्मभिरेवभविष्यतिआपत्तंवोक्तप्रतिदर्शनेनयोगभ्रष्टगतिवन्त्तानीयकंनतुतस्यैवानपफलंस्वर्गादिभवितुमर्हतस्तुनिर
मुक्त्वादिति ॥१२॥ ञ

गौ २

ननु आत्मनः कर्मलेपनिमित्तं यत्कर्तृत्वानुसंधानं तत्किं योषिदग्निषु स्मादिवदाहार्यं तु न वास्तवमेवमद्वितीयाध्ययन तुक्तेऽत्वे नैतत्रमिति शास्त्रदृष्टा
कर्तृत्वतिरोधाने नाकर्तृत्वमेव माप्यते इत्याशंक्य अग्नित्वेन दृष्टायां योषिति रग्नित्वादर्शनेन कल्पिते नाकर्तृत्वेन तत्कर्मलेपस्यासंभवात् आ-
धं निस्पृहितीयमुपपादयिष्यन् धीरिकामाचरति हे महाबाहो सर्वकर्मणां सिद्धये इमानि वक्ष्यमाणानि पंच कारणानि निर्वर्तकानि मे मद्वचनात् निबोध बुध्य-
स्व वचनेन विश्वासोत्पादनार्थं कारणानां [illegible] सम्यक्त्वमाह सांख्ये कृतांते प्रोक्तानीति सम्यक् ख्यायते प्रकाश्यते आत्मतत्त्वमनेनेति सांख्यं वेदांतशास्त्रम् तत्
त्वपदार्थरूपिता यस्मिन् तत्सांख्यं वेदांतशास्त्रं तस्मिन्नेव विशिनष्टि कृतस्य कर्मणोंऽतः परिसमाप्तिर्यस्मिन् सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यत इ-
ति आत्मज्ञाने सति सर्वकर्मणां समाप्तेर्दर्शितत्वात् तस्मिन् सांख्ये कृतांते प्रोक्तानि १३ तान्येव पंच गणयति अधिष्ठानमिति अधिष्ठानं इच्छाद्वेषसुख

पंचैतानि महाबाहो कारणानि निबोध मे सांख्ये कृतांते प्रोक्तानि सिद्धये सर्वकर्मणाम् १३ अधिष्ठानं तथा कर्ता क-
रणं च पृथग्विधम् विविधाश्च पृथक्चेष्टा दैवं चैवात्र पंचमम् १४

दुःखज्ञानादीनामभिव्यक्त्याश्रयो देहः तस्मान्नात्मत्वं [illegible] चार्वाकस्येति अकस्मात्तत्वादिसिद्धं तथा कर्ता बुद्धिविशिष्टश्चिदाभासः प्रमाता तेना
हं मम विषयो हंकारः तथा च मनेन तद्देहस्य अनात्मत्वं यत्तेप्युपदर्शितं देहस्यैव मरणोपलये च तस्माद्युमन्निविनाशयोर्दर्शनात् अत्त्वविशेषणानाशादि
शिष्टनाशं विशेषणोत्तमा च विशिष्टोऽस्त्विमभिप्रायमस्थपेत विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यतीति यथास्थेः ह्रदाविस्प्
लिंगा व्युच्चरंत्येवमेतस्मादात्मनः सर्व एत आत्मनो व्युच्चरंतीति विशिष्टस्य कानतिविशिष्टस्य चानतिरेकेणात्मत्वं सिद्धं कारणं च शब्दाद्युपलब्धि
साधनं पृथग्विधं द्वादशविधं पंच [illegible] कर्मेंद्रियाणि पंच ज्ञानेंद्रियाणि मनो बुद्धिश्च तथा विविधाश्च पृथक्चेष्टाः वायवीयाः प्राणादिरूपाः दैवं पुण्यपा
परूपं तत्त्रत्कारणानुग्राहकसूर्यादिदेवताकृपं च पंचमं पंचानां पूरणं १४

शरीरेति न्याय्यं धर्म्यं शास्त्रीयं विपरीतमन्याय्यमधर्म्यमशास्त्रीयं ननु शरीरादिभिस्त्रिभिरारभ्यते पंचैते तस्य हेतव इति च विप्रतिषिद्धमुच्यते नैष दोषः
अत्रापि शरीरपदेनाधिष्ठानस्य नरपदेन कर्तुर्वाङ्मनःइति करणस्य आरभत इति चेष्टानां न्याय्यमित्यधर्मपदेनादृष्टस्य दैवस्य च संग्रहात् सर्वेषु कर्मसु पंचानां समा-
नेपि उपयोगे विधिप्रतिषेधलक्षणं त्रिविधमेव कर्म शास्त्रे प्रसिद्धमिति इदं शारीरं कर्म इदं मानसमिदं वाचकमिति व्यपदेशो देहादीनां प्राधान्यापेक्ष इति
न कश्चिद्विरोधः १५ एवं प्रतिपादनफलं कर्तृत्वस्यारोपितत्वसिद्धि [illegible] कर्तृत्वस्य स्वाभाविकत्वसिद्धिश्चेति द्वाभ्यां श्लो-

शरीरवाङ्मनोभिर्यत्कर्म प्रारभते नरः न्याय्यं वा विपरीतं वा पंचैते तस्य हेतवः १५ तत्रैवं सति कर्तारमात्मानं केव-
लं तु यः पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मतिः १६

काभ्यां दर्शयति [illegible] तत्रेति तत्र तस्मिन् कर्मणि एवं उक्तरीत्या पंचभिर्निर्वर्त्ये सति केवलं तं अकर्तारमपि आत्मानं चेतनं साक्षी चेता केवलो निर्गु-
णश्चेति श्रुतेः अधिष्ठानादिपंचकप्रचारदर्शिनमुदासीनमपि यः कर्तारं कर्तृत्वाश्रयं पश्यति स दुर्मतिः पापाभिभूतमतिर्न पश्यति अन्ध एव
सः अदर्शने हेतुः अकृतबुद्धित्वादिति शास्त्राचार्योपदेशशमदमादिसंस्कृता बुद्धिर्यस्य स कृतबुद्धिः तद्विपरीतोऽकृतबुद्धिस्तस्य भावस्तत्त्वं तस्मा-
त् यथा स्वमुखस्योदपात्रसंसर्गित्वं पश्यता जलचांचल्यमपि तत्रारोप्यते एवमात्मनो बुद्धिसंसृष्टत्वं पश्यता बुद्धिधर्मः कर्तृत्वादिरप्यात्मन्यारोप्य-
त इति भावः १६

द्वितीयं प्रयोजनमाह यस्येति यस्य प्रमातुर्भावः प्रमयमात्रस्वरूप आत्मा नाहंकृतः अहमिव कृतो अहंकारेण तादात्म्यं प्रापितो हंकृतः तथा न यस्य बुद्धिर्लिप्यते आत्माभावेनांजिता न भवति यस्य बुद्धेर्धर्मा इति भिन्नमात्मानं पश्यतो बुद्धिधर्माः कर्तृत्वादयो नात्मनि प्रतीयंते इति कर्त्रात्मवादितार्किकनिरासः यस्य च आत्मधर्मस्थैव तस्मात् रचो बुद्धो न संसृज्यंत इति बुद्धिमेव चेतनां वदतो बौद्धस्य निरासः निश्चितोऽस्मोऽस्मिन्नात्मा स्वधर्माख्यासो यस्य नास्तीति

यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते हत्वापि स इमांल्लोकान्न हंति न निबध्यते १७ ॥ ॥

र्थः अत्र न हंतीत्यात्मनि कर्तृत्वाभावो दर्शितः न निबध्यत इति दुःखादिसंसर्गनिषेधेन भोक्तृत्वाभावो दर्शितः हत्वापि स इमांल्लोकान्न हंति न निबध्यत इति तु स्तुतिमात्रं कर्तृत्वस्यैव बाधेन हंतृत्वायोगात् स्वप्रवत् कर्तृत्वानुसंधानावपि हनन क्रियायां प्रवर्तकस्य रागद्वेषादेरभावात् च एतेन आत्मनस्तात्त्विकमकर्तृत्वं भावयता ह्यनेकमेष्यताविर्कर्तृत्वाभिमाननिमित्तं स्वफलं संप्रोतुं नार्हतीति दर्शितं न हि रज्जुबुद्ध्या सर्पं हरतः सर्पद्रोहभयं शंकेन फलं भवति सर्पेतु तथा कुर्वंतमल्लं भवत्येव तद्वदिहापि ज्ञेयं १७

न निवध्यते इति भोक्तृत्वमपि प्रत्यगात्मनः स्यात् तत्र न्यामध्यामहे नहि कुलालादयः स्वयुक्ताएव घटादीन्निर्वर्तयंतीति किंतु २

समाधत्ते सात्विकस्यात्मोपपादनेयोगी आत्मनोऽकर्तृत्वोपपादनप्रकारः स्वयमाह सांख्ये यः यदुक्तं पंचैतेनतस्यहेतवइतियच्चोक्तं नहंतेतीति तन्मृषा
महेन सपरिणामी चेत् न परिस्पंदात्मकस्य कायिकादिभेदेन त्रिविधस्य कर्मणः कर्ता भवतीति वक्तुं युज्यते यत्तु भोक्तृत्वं पुरुषस्य प्रयुक्तः स्वमथा
भोक्तृणाम भावे चैवर्थ्यंवतत्प्रवृत्तिरित्यायतति एवं प्रधानमात्रा भूताः कर्त्रादयः पुरुषस्य भोगापवर्गसाधनप्रयुक्ताः सर्वाणि निवर्त्तयंतितस्मा
त्पुरुषस्य भोक्तृत्वस्वभावत्वात्तस्य कर्तृत्वानुसंधानपूर्वकमपि कृतं कर्मभोक्तास्वरूपमवभोक्तव्यमिति सात्विकमार्गपिकर्मालिप्यवचनमसंगतमि
ति अत्र प्रतिविधत्ते ज्ञानं ज्ञेयमिति ज्ञानं ज्ञायतेऽनेनेति प्रकाशात्मवस्तुतत्वमनेनेति प्रमहाद्विमाणाजमोघटादिप्रकाशः वर्त्तमानमत्तीनं वा ज्ञेयं बोधविष
योघटादिः परिज्ञाता विषयी सामान्यबोधरूपो भोक्तृमिमुच्यते एवं रूपप्रकारत्रयवती त्रिविधाकर्मणां चोदनानाम्प्रवृत्तिसमुच्चितं सत्कर्मणां प्रवर्त्तक

ज्ञानं ज्ञेयं परिज्ञाता त्रिविधा कर्मचोदना करणं कर्म कर्तेति त्रिविधः कर्मसंग्रहः १८ ॥ ॥ ६७ ॥

मित्यर्थः सत्यपि ज्ञेये ज्ञातरिवाज्ञाते प्रवृत्त्यनुपपत्तेः ज्ञाने ज्ञातरि च सति देशकालव्यवहिते ज्ञेये प्रवृत्त्यनुपपत्तेः सत्यपि संस्कारात्मके ज्ञाने ज्ञेये व्यव
निहिते तथापि प्रमात्रभावात् प्रवृत्त्यदर्शनात् एतत्त्रयं त्रिविधविधं भवस्मोक्षापेक्षं सत्कूर्कायजनयति हानोपादानोपेक्षाबुद्धित्वात् ज्ञानादीनुकूले
व्यापारे प्रवर्त्तयंतीति कर्तृपदाभिधेयमित्यर्थः चोदनेति करोति अनया इति स्वस्वभावं तेनेन चोदनाश्चेः कर्तृवाचि लिंगमभिधेयं लोकाः स्वत्वालिं
गस्येतिवा तथा कारणमिंद्रियं कर्मतेन क्रियमाणं विषयग्रहणं कर्त्ता पूर्वोक्त एव परिज्ञाता एतत्त्रयं समुदितं सत्कर्मसंग्रहः ईप्सिततमस्य भो
ग्यस्य संग्रहः संगृह्यते अस्मिन्निति संग्रहः स्यात् भोक्तृत्वं सर्वैः सत्यपि भोक्तरि करणे च क्रियां विना भोगासंभवात् किं पायाद्या स्वात्र ॥

यंविनास्वरूपलाभाभावात्आश्रयस्यकरणंविनाभोगकर्तृत्वानुपपत्तेश्चएतत्त्रयमितितंसन्तंभोक्तेत्युच्यतइत्यर्थः तथाचश्रुतिः आत्मेंद्रियमनोयुक्तं
भोक्तेत्याहुर्मनीषिणाइतिइंद्रियंचमितिइंमनतस्मनेनबुद्धिरेवग्रहणेनतयुक्तंइंद्रियद्वारामनतेभोग्येनसहसंबंधक्रियाःइंद्रियंचमनश्चयुक्तंचेतिविग्रहेइंद्रि
यमनोयुक्तमितिद्वंद्वैकवद्भावः एवंअयंभोक्ताआत्मेत्याहुर्मनीषिणाइतिश्रुत्यर्थः एवंहिश्रुतिस्मृत्योर्व्याख्यानेनतयोर्मूलमूलिभावोयुज्य
तेनान्यथातथाचकर्तृत्ववत्भोक्तुरपिअनात्मगुणापतितत्वात्भोक्तृत्वंभोगकर्तृत्वंभोक्तृभावमितिनिर्वचनात्यःकर्त्तासएवभोक्तेतिप्रतिपादना
त्अहमकर्त्ताःभोक्तेतिचानुसंधानपूर्वकंकर्माणिकुर्वीत कर्तृत्वभोक्तृभावबद्धककर्मलेपोनास्तीतिसिद्धंभाष्यस्यचायमेवार्थःयेनतुकारणंक्रि
यायाःसाधकरूपंदशविधंवाख्यंमनोबुद्धिसम्मतंकर्मसंग्रहः कर्मकर्त्तुरीप्सिततमंक्रिययाव्याप्यमानमुत्पाद्यमाप्यंवाकार्यंसंस्कार्यंचेतिच
तुर्विधंकर्तृत्विंताप्रयोजकश्चेतिद्वाभ्यामपिएतत्त्रयंकर्मसंग्रहःकर्माश्रयःकर्तेत्यर्थः ज्ञानंविषयप्रकाशनशक्तिः ज्ञेयंविषयःपरिज्ञाताज्ञा
नाश्रयोभोक्ताएतत्त्रयंकर्मणांप्रवर्तकमितिव्याचख्यौतेषामपिआत्मानंकर्तारमपिसांख्यानामिवभोक्तृत्वेनप्रकृतेःप्रवर्तकत्वेसेव
शयः तथापिक्रिययाव्याप्यमानस्यबलयंसमानिकादिनेदानहीस्यघटादिकंयस्यकर्मणाःकर्तृकोटौप्रवेशायोगः तस्यनिया
भूयतमात्रविवक्षायांप्रकृतेकथमनुपयोगंअस्मध अस्माकंतुघटादिव्याकक्रियायाःकर्मशब्दवाच्यत्वंमुख्यकोटिप्रवेशश्चक्रि
याक्रियावतोधर्मधर्मिणोरभेदापेक्षयायुज्यतेतथाज्ञानेप्रकाशमत्रियेत्तिमतेक्रियाहृदेषस्मिन्प्रवर्तकज्ञानांतरस्यापेक्षेतितत्रतत्र
तस्यामस्यापेक्षेत्यनवस्थापत्तुर्वारा १८

वि

प

एवं श्लोकोक्तेज्ञानाद्विषहेपी ज्ञाताकर्त्रोश्चेकस्येवेति पी शिष्टः पंचैतेषां प्राकृतत्वेन त्रिगुणात्मकत्वं प्रसिद्धं ज्ञेयकरणयोर्घटकुठारकल्पयोः प्रसि
द्ध्यर्थं त्रयाणामेव प्रत्येकं त्रिविधत्वं विवक्षितं तु प्रतिजानीते ज्ञानं कर्म च कर्ता चेति त्रयमेव गुणभेदतस्त्रिधा न तु ज्ञेयकरणे गुणसंख्याने कापिल
शास्त्रे यद्यपि तत्र एकस्यां प्रमदायां भर्तुः सुखं जायते तेन तं प्रति तस्याः सत्वोद्भूतत्वात्तामविंदतश्चैत्रस्य दुःखं जायते तं प्रति तस्याः रजउद्भू

ज्ञानं कर्म च कर्ता च त्रिधैव गुणभेदतः प्रोच्यते गुणसंख्याने यथावच्छृणु तान्यपि १९ १९

तत्वात्तस्यामेव सपत्न्या द्वेषः तां प्रति तस्यास्तमसउद्भूतत्वात् प्रमदयैव सर्वे भावा व्याख्याता इति कापिलानां ज्ञेयकरणयोरपि त्रैविध्यं
प्रसिद्धं तथापि प्रमदारूपस्यैकस्यैव पुंसो निमित्तभेदेन प्रीतिदुःखद्वेषविषया अपि भवंतीति सर्वैरिकव्यवस्थया निर्मूलित्वात् प्रीत्यादीनां
कर्तृसमवायितया प्रतीयमानानां आलंबनभूतायाः प्रमदायाः प्रीत्याद्यात्मकत्वं कल्पयितुं न शक्यत इति न भगवता तयोस्त्रिविध
त्वमाख्यायते अत्र ह्यार्थः स्पष्टः १९

एवंज्ञानादित्रयस्य त्रैविध्यं वक्तुं प्रतिजानाति यज्ज्ञानं त्रैविध्यं तावदाह सर्वभूतेष्विति तथा कटककुंडलादिषु भावत्वेमानेषु तत्त्वविवेकं कांचनमेवेदमिति पश्यति एवं येन ज्ञानेन सर्वभूतेषु विभक्तेषु नानारूपभेदभिन्नेषु अव्ययमपरिणामि नित्यमेकं भावं चिन्मात्रस्वरूपं ईक्षते सर्वं ब्रह्मैवेति पश्यति तत् ज्ञानं सात्विकं विद्धि एकात्मज्ञानमेव सात्विकमित्यर्थः २० भेदज्ञानस्य राजसत्वमाह पृथक्त्वेनेति यत्तु पत पृथक्त्वेन भिन्नत्वेन ज्ञानं तद्राजसमिति संबंधः पृथक्त्वेनेत्येतत् गोति सर्वेषु भूतेषु पांचभौतिकत्वेनाविशिष्टेषु नानाभावान् बहुन रतिर्येकस्थावरत्वभेदेन नानाभावानिति बहुवचनं अनंतभेदप्रदर्शनार्थं पृथक्विधान् एकजातीयेष्वपि नरादिषु धर्मैकैर्विभिन्नप्रकारान् यत् ज्ञानं वेत्तीति विषयीकरोतीति येन ज्ञानेन वेत्तीति वक्त

सर्वभूतेषु येनैकं भावमव्ययमीक्षते अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्विकं २० पृथक्त्वेन तु पतज्ञानं नाना भावान्पृथग्विधान्वेत्ति सर्वेषु भूतेषु तज्ज्ञानं विद्धि राजसं २१ यत्तु कृत्स्नवदेकस्मिन्कार्ये सक्तमहेतुकं अतत्वा र्थवदल्पं च तत्तामसमुदाहृतं २२

व्यं एधांसि पचंतीतिवत् ज्ञानं वेत्तीति करणे कर्तृत्वोपचारो बोध्यः तेन आत्मनां परस्परभेदात्तेषामीश्वरान्भेदः तेभ्यो ईश्वरो द्भेदोन्मतस्य जडवर्गस्य भेद इति औपाधिकभेदज्ञानं कृत्वा किंकारांग राजसमेवेत्यभिप्रायः २१ यत्तु ज्ञानं एकस्मिन्कार्ये देहे प्रतिमादौ वा कृत्स्नवत् परिपूर्णवदेतावानेवात्मा ईश्वरो वेति सक्तं अभिनिवेशयुक्तं अहेतुकं निरुपपत्तिकं अतत्वार्थवत् परमार्थावलंबनशून्यं अल्पं तत्त्वाविषयत्वात् अल्पफलत्वात् यदेवंभूतं ज्ञानं तत्तामसमुदाहृतं २२

अथ कर्मत्रैविध्यमाह नियतमित्यादिना नियतं नित्यं संगरहितं अभिमानवर्जं रागद्वेषे प्रीतिः द्वेषो । विद्वेषः अप्रीतिः ताभ्यां कृतं इष्टानिष्टप्राप्ति
परिहारार्थं कृतं रागद्वेषतः कृतं तस्मात् अरागद्वेषतः कृतं निष्काममित्यर्थः फलानुबन्धी मतेर्वेति फलं क्रियया प्राप्यमनावश्यकं मदफलमनागं
तुकं परिपूर्णमविनाशि आत्मतत्त्वं तत्प्रेप्सुना कृतं विविदिषंति यज्ञेनेति श्रुत्या आत्मलाभार्थं यज्ञादेर्विनियोगात् तत्कर्म सात्विकमुच्य
ते २३ यत्तु कामेप्सुना फलार्थिना साहंकारेण वा यद्यपि सात्विकोऽप्यनात्मवित् साहंकारस्तथापि अहमेव कर्मकुशलो महाश्रोत्रिय इत्य
भिमानोऽहंकारस्तद्वता साहंकारेण वा शब्दश्चार्थे क्रियते बहुलायासं अतिश्रमकरं तत्कर्म राजसमुदाहृतं २४ अनुबंध्यतेऽनेनेत्यनुबंधः फ

नियतं संगरहितमरागद्वेषतः कृतं अफलप्रेप्सुना कर्म यत्तत्सात्विकमुच्यते २३ यत्तु कामेप्सुना कर्म साहंकारेण
वा पुनः क्रियते बहुलायासं तद्राजसमुदाहृतं अनुबंधं क्षयं हिंसामनपेक्ष्य च पौरुषं मोहादारभ्यते कर्म तत्तामसमु
दाहृतं २५ मुक्तसंगोऽनहंवादी धृत्युत्साहसमन्वितः सिद्ध्यसिद्ध्योर्निर्विकारः कर्ता सात्विक उच्यते २६ ६६६६

लं क्षयं शक्तेर्धनोचनाशं हिंसां परपीडां पौरुषं सामर्थ्यं अनपेक्ष्य अतालोच्य केवलं मोहादविवेकतो यदारभ्यते कर्म तत्तामसमुदाहृतं
२५ कर्तृत्रैविध्यमाह मुक्तेत्यादिना मुक्तसंगः त्यक्ताभिनिवेशः अनहंकारी गर्वोक्तिरहितः धृतिर्धैर्यं उत्साह उद्यमः तावपि प्राप्येवेति बुद्धिर्निश्च
यः ताभ्यां समन्वितः सिद्ध्यसिद्ध्योः कर्मण आरब्धस्येति शेषः निर्विकारः हर्षविषादशून्यः कर्ता सात्विक उच्यते २६ ॥ ॥ ॥

रागीविषयलोलुपः अतएवकर्मणः फलंप्रेप्सतीतिकर्मफलप्रेप्सुः लुब्धः परद्रव्यादिषुसंजाततृष्णः तीर्थादिषुवाद्रव्यापरित्यागीहिंसात्मकः परपीडाकरस्व
भावः अशुचिर्बाह्यांतःशौचवर्जितः इष्टानिष्टप्राप्तौहर्षशोकाभ्यामन्वितश्चयःकर्त्तासराजसः परिकीर्त्तितः २७ अयुक्तः अनवहितः प्राकृतः असंस्कृतबुद्धि
र्बालसमः स्तब्धः ईश्वरवन्नमतिकस्मैचित् शठः शक्तिगूहनकारीनैष्कृतिकः परावमानीवाअलसः अप्रवृत्तिशीलः कर्त्तव्येष्वपिनिषादीसर्वदाअवसन्नस्व
भावः दीर्घसूत्रीचिरकालीएकाहसाध्यंकार्यंमासेनापिकरोतीत्यर्थः एवंभूतः कर्त्तासतामसउच्यते २८ बुद्धिधृतीत्रैविध्येनव्याख्यातुमाहबुद्धेरितितत्रबुद्धि
विशिष्टस्थिराभासः कर्त्तावुद्धिवृत्तिज्ञानंचप्रागुक्तं अत्रतुकेवलाबुद्धिवृत्तिमतोतदीयवृत्त्यंतरोपलक्षणार्थंतत्रिविशेषोधृतिश्चकथ्यतेत्रैविध्येनकथ्य

रागीकर्मफलप्रेप्सुर्लुब्धोहिंसात्मकोशुचिः हर्षशोकान्वितः कर्त्ताराजसः परिकीर्तितः २७ अयुक्तः प्राकृतस्तब्धः शठोनै
